## वर्णाः

पः दूरप्रियता तीक्ष्णा लोहितः पञ्चमो रमा ।
गुह्यकर्त्ता निधिः शेषः कालरात्रिः सुवाहिता ॥
तपनः पालनः पाता पद्मरेणुर्निरञ्जनः ॥
सावित्री पावनी पानं वीरतत्त्वो धनुर्द्धरः ॥
पालनस्थाने पावन इति तत्त्वस्थाने तन्त्र इति
वा पाठः ।
दक्षपार्श्वश्च सेनानी मरीचिः पवनः शनिः ।
उड्डीशं जयनी कुम्भोऽलसं रेखा च मोहकः ॥
कुम्भस्थाने कान्तः इति रेखास्थाने रेषा इति
वा पाठः ।
मूला द्वितीयमिन्द्राणी लोकाक्षी मन
आत्मनः ॥
आत्मनः स्थाने आत्मक इति वा पाठः । पः ॥
फः सखी दुर्गिणी धूम्रा वामपार्श्वो जनार्द्दनः ।
जया पादः शिखा रौद्री फेत्कारः शाखिनी
प्रियः ॥
उमा विहङ्गमः कालकुब्जिनीप्रियपावकौ ।
प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः शशी ॥
फुत्कारो यामिनी व्यक्ता पावनी मोहवर्द्धनः ।
निष्फलवागहङ्कारः प्रयागो ग्रामणीः फलम् ॥
व्यक्तास्थाने झञ्झा इति प्रयागस्थाने प्रयाण
इति वा पाठः । फः ॥
बो वनी भूधरो मार्गो घर्घरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्द्दिनी ॥
पृष्ठवंशो भया मातुः शिखिवाहो युगन्धरः ।
सुखबिन्दुर्बली घण्टा योद्धा त्रिलोचनप्रियः ॥
सुखबिन्दुस्थाने सुखबिन्दुरिति वा पाठः ।
क्लेदिनी तापिता भूमिः सुगन्धिवलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारी वसुधाधिपः ॥
सुगन्धिस्थाने सुगन्धिश्चेति वा पाठः ।
षष्ठी पुरश्च पेटा च मोदको गगनं प्रति ।
पूर्व्वाषाढ़ामध्यलिङ्गौ शनिः कुम्भहतीयकौ ॥बः॥
भः क्लिन्ना भ्रमरो भीमो विश्वमूर्त्तिर्निशातवम् ।
हिरण्डो भूषणो मूलं यक्षछत्रस्य वाचकः ॥
निशातवस्थाने निशाभयं इति वा पाठः ।
नक्षत्रं भ्रमणा दीप्तिर्वयो भूमिः पयो नभः ।
नाभिभद्रं महाबाहुर्विश्वमूर्त्तिर्विताण्डकः ॥
वयःस्थाने भय इति विताण्डकस्थाने विमूर्त्तक
इति वा पाठः ।
प्राणात्मा तापिनी वत्सा विश्वरूपी च चन्द्रिका ।
भीमसेनः सुधासेनः सुखो मायापुरं हरः ॥
वत्सस्थाने रुद्रा इति सुखस्थाने सुख इति वा
पाठः । भः ॥
मः कालो क्लेशितः कालो महाकालो महा-
न्तकः ।
वैकुण्ठो वसुधा चन्द्रो रविः पुरुषराजकः ॥
वसुधास्थाने वसुदा इति वा पाठः ।
कालभद्रो जया मेधा विश्वदा दीप्तसंज्ञकः ।
जठरश्च भ्रमागानं लक्ष्मीमातोग्रबन्धनौ ॥
दीप्तस्थाने दीप्र इति वा पाठः ।
विविं शिवो महावीरः शशिप्रभा जनेश्वरः ।
प्रमत्तः प्रियस्र रुद्रः सर्व्वाङ्गो वह्निमण्डलम् ॥

## वर्णाः

मातङ्गमालिनी बिन्दुः श्रवणाभरणो वियत् ॥
रथस्थाने मख इति वा पाठः । मः ॥
यो वाणी वसुधा वायुर्विकृतिः पुरुषोत्तमः ।
युगान्तः श्वसनः शीघ्रो धूमार्चिः प्राणिसेवकः ॥
युगान्तस्थाने युगाभ इति वा पाठः ।
शङ्खा भ्रमो जटी लोला वायुवेगी यशस्करी ।
सङ्कर्षणः चपा वालो हृदयं कपिला प्रभा ॥
आग्नेयो व्यापकास्त्यागो होमो यानं प्रमा
सुखम् ।
चण्डः सर्व्वेश्वरी धूमचासुण्डा सुमुखेश्वरी ॥
प्रमास्थाने प्रभा इति वा पाठः ।
त्वगात्मा मलयो माता हंसिनी भृङ्गिनायकः ।
तेनमः शोषको मीनो धनिष्ठानङ्गवेदिनी ॥
त्वगात्मास्थाने विगात्मा इति तेनमस्थाने येमन
इति वा पाठः ।
मेष्ठः सोमः पक्तिनामा पापहा प्राणसंज्ञकः ॥
मेष्ठस्थाने सेष्ट इति वा पाठः । यः ।
रो रक्तः क्रोधिनी रेफः पावकस्त्वोजसो मतः ।
प्रकाशा दर्शनो दीपो रतकृष्णा परं बली ॥
स्त्वोजसस्थाने स्तेजन इति रतकृष्णास्थाने रक्त-
कृष्ण इति वा पाठः ।
भुजङ्गेशो मतिः सूर्य्यो धातू रक्तः प्रकाशकः ।
व्यापको रेवती दासं कुब्जंशो वह्निमण्डलम् ॥
दासस्थाने दानमिति कुब्जंशस्थाने दर्वांश
इति वा पाठः ।
उग्ररेखा स्थूलदण्डो वेदकण्ठपला पुरा ।
प्रकृतिः सुगलो ब्रह्मशब्दश्च गायको धनम् ॥
वेदकण्ठपलास्थाने वेदकक्षपला इति वा पाठः ।
श्रीकण्ठ उग्रा हृदयं सुण्डी त्रिपुरसुन्दरी ।
सविन्दुर्योनिजो ज्वाला श्रीशैलो विश्वतोमुखी ॥
श्रीशैलस्थाने श्रीशोण इति वा पाठः । रः ।
लश्चन्द्रः पूतना पृथ्वी माधवः शक्रवाचकः ।
बलानुजः पिनाकीशो व्यापको मांससंज्ञकः ॥
माधवस्थाने माधवी इति वा पाठः ।
खड्गी नादोऽमृतं देवी लवणं वारुणी पतिः ।
शिखा वाणी क्रिया माता भामिनी कामिनी
प्रिया ॥
अमृतस्थाने अङ्कमिति लवणस्थाने भरणमिति वा
पाठः ।
ज्वालिनी वेगिनी नादः प्रद्युम्नः शोषणो हरिः ।
विश्वात्ममन्त्रौ वरुणो चेतो मेरुगिरिः कला रसः ॥
मन्त्रस्थाने मन्द्र इति कलास्थाने कला इति वा
पाठः । लः ।
वो वाणी वारुणी सूक्ष्मा वरुणो मेदसंज्ञकः ।
खड्गीशो ज्वालिनी वह्निः कलसध्वनिवाचकः ॥
वह्निस्थाने रङ्ग इति कलसध्वनिस्थाने कलसंरवि
इति वा पाठः ।
उत्कारीशस्तु ना वीतो वक्ता स्फिक् सागरः ·
शुचिः ।
त्रिधातुः शङ्करः श्रेष्ठो विशेषो यमसादनम् ॥वः॥
शः सत्यश्च कामरूपी कामरूपी महामतिः ।
सौख्यनामा कुमारोऽस्थि श्रीकण्ठो वृषकेतनः ॥

## वर्णाः

वृषघ्नः शयनं शान्ता सुभगा विस्फुलिङ्गिनी ।
मृत्युर्देवो महालक्ष्मीर्महेन्द्रः कुलकौलिनी ॥
बाहुर्हंसो वियद्वक्त्रं हृदनङ्गाङ्कुशः खलः ।
वामोरुः पुण्डरीकात्मा कान्तिः कल्याणवाचकः ।
हंसस्थाने हिंसा इति वा पाठः । शः ॥
षः श्वेतो वासुदेवश्च पीता प्रज्ञा विनायकः ।
परमेष्ठी वामबाहुः श्रेष्ठो गर्भविमोचनः ॥
पीतास्थाने प्रीता इति प्रज्ञास्थाने श्रद्धा इति
वा पाठः ।
लम्बोदरो यमौजेशः कामधुक् कामधूमकः ।
सुश्रीरुग्रा वृषो लज्जा मरुद्भक्ष्यः प्रियः शिवः ।
कामधूमकस्थाने कालधूमक इति वा पाठः ।
सूर्य्यात्मा जठरः कोषो मत्ता वक्षोविदारिणी ।
कलकण्ठो मध्यभिन्ना बुद्धात्मा मलपूः शिवः॥षः॥
सो हंसः सुयशा विष्णुर्भृग्वीशश्चन्द्रसंज्ञकः ।
जगद्बीजं शक्तिनामा मोहं वेशवती भृगुः ॥
सुयशास्थाने सुजन इति मोहस्थाने सोऽहं इति
वा पाठः ।
प्रकृतिरीश्वरः शुद्धो प्रभा श्वेता कुलोज्ज्वलः ।
दक्षपादो मृतं ब्राह्मी परमात्मा परोऽक्षरः ॥
सुरूपा च गुणेशो गौः कलकण्ठो वृकोदरो ।
प्राणाद्याश्च पुरादेवी लक्ष्मीः सोमो हिरण्यपुः ॥
दुर्गोत्तारिणि सन्दोहात्मीवो मर्म्ममनोहरः ॥
दुर्गोत्तारिणिस्थाने दुर्गोत्तारिणी इति सन्दो-
हात्स्थाने सन्दोहा इति मनोहरस्थाने मनोयव
इति वा पाठः । सः ।
हः शिवो गगनं हंसो नागलोकोऽम्बिका-
पतिः ।
नकुलीशो जगत्प्राणः प्राणेशः कपिला मलः ॥
मलस्थाने मत इति वा पाठः ।
परमात्मात्मजो जीवो यवाकः शान्तिदोऽङ्गनः ।
मगो भयो वराख्याणः क्रुटकूपविरावणः ॥
यवाकस्थाने वराक इति अङ्गनस्थाने अङ्गुल
इति क्रुटकूपविरावणस्थाने कूटकोपरिवारण
इति वा पाठः ।
लक्ष्मीर्मविहरः शम्भुः प्राणशक्तिर्ललाटजः ।
सकोपवारणः शूली चैतन्यं पादपूरणः ॥
मविहरस्थाने हरिहर इति सकोपस्थाने
सकोप इति वा पाठः ।
महालक्ष्मीः परं नादो मेघनादो हरिस्मितः ।
बिन्दुर्दुर्गा प्रिया देवी मेघश्यामेश्वरः पुमान् ॥
दक्षपादः सदाशम्भुः शाखोटः सोममण्डलम् ॥हः
ळः पृथ्वी विमला मोघोऽनन्तो हयवहा सिता ।
व्यापिनी शिवदा केतुजगत्सारतरं हठः ॥
मौमेड्डानी च वेदार्थः सारो नारायणः स्वयम् ।
जठरो नकुलिः पीता शिवेशोऽनङ्गमालिनी ॥ळः॥
क्षः कोपस्तुम्बकः कालो रूक्षः संवर्त्तकः परः ।
नृसिंहो विद्युता माया महातेजा युगान्तकः ॥
स्तुम्बकस्थाने स्तुबुक इति रूक्षस्थाने यक्षमिति
परस्थाने पय इति वा पाठः ।
परात्मा क्रोधसंहारी बलान्तो मेरुवाचकः ।
सर्व्वाङ्गः सागरः कामः संयोगान्त्यक्षिपूरकः ॥